# हरिदाससिद्धान्तवागीशः

वर्तमानवङ्गदेशस्य फरीदपुरमण्डलस्य उनशिया इति ग्रामे १८७६ ईशवीयशतके हरिदाससिद्धान्तवागीशमहोदयः जायते स्म, तस्य पिता आसीत् गङ्गा गङ्गाधरविद्यालंकारः माता च विधुमु विधूमुखीदेवी। हरिदासमहोदयः ख्यातनामा पण्डितवंशे अजायत। पितामहकाशीचन्द्रवाचस्पतीं निकषा पञ्चवर्षीयहरिदासस्य प्रथमहस्तलेखनम् अभवत, गौलानिवासीरमानाथठाकुरस्य प्रथमा कन्या श्रीमतीसरलासुन्दर्या सह हरिदासस्य विवाहः भवति स्म, तेन शंकरसम्भवकाव्यम्, कंशवधजानकीविक्रमनाटकद्वयम्, वियोगवैभव नाम खण्डकाव्यम्, साकल्येन ग्रन्थचतुष्टं विरचितम्, काव्यव्याकरणपुराणज्योतिषदर्शनविषये तस्य गभीरप्रज्ञा आसीत्। हरिदासस्य जीवनचर्यायाम् तस्य पितामहस्य महान् प्रभावः आसीत्। स्वरचितः शिवाजिचरितम् इति नाटकं पितामहकाशीचन्द्रवाचस्पतिं समर्पयतिस्म। हरिदासमहोदयस्य असीमप्रज्ञावशात् ढाकासारस्वतसमाज इति प्रतिष्ठानतः 'सिद्धान्तवागीशः' इति उपाधिं प्राप्तवान्। तस्य बहुमुखीप्रतिभा आसीत्, सः कविनाट्यकारटीकाकारसमालोचकप्रकाशकरूपैः ख्यातिं लब्धवान्। १९४० ईशवीयशतके महामहोपाध्यायः इति उपाधिं प्राप्तवान्।

Scanned with CamScanner

सः श्यामासुन्दरीविषणापुरस्कारं 'रुक्मिणीहरणम्' इति महाकाव्यं तेन विरचितम्, अनेन काव्येन टीकाशारदेश्यामानतः स श्यामासुन्दरीविषणापुरस्कारम् अर्जयति स्म, तस्य प्रज्ञाप्रकर्षात् भारतीयपण्डितमहामण्डलपक्षतः 'महाकविः' इति उपाधिं लेभे, तद्व्यतिरिच्य 'भारताचार्यः', रवीन्द्रपुरस्कारः, 'पद्मभूषण' इति उपाधित्रयं तेन प्राप्तम्। तेन बहुनि ग्रन्थानि विरचितानि — स्मृतिचिन्तामणिः, वियोगवैभवम्, काव्यकौमुदी, युधिष्ठिरस्य समयः प्रभृतयः,

तेन भारतकौमुदी नाम्ना समग्रमहाभारतस्य मूलवङ्गानुवादसहटीका विरचिता, अभिज्ञाननाटकस्य अभिज्ञानकौमुदी-टीका तेन रचिता, दशकुमारचरितस्य उपरि कुमारसन्तोषिणीटीका तेन निर्मिता, मृच्छकटिकस्य टीकायाः नाम वसन्तसुषमा, नैषधचरितस्य जयन्तीटीका, मेघदूतस्य टिप्पनी नाम चञ्चला, साहित्यदर्पनस्य कुसुमप्रतिमा टीका, मुद्राराक्षसस्य चाणक्यचातुरी टीका तेन कृता।

—o—

Teacher Name - Sanchita Chakraborty
Sub - Sanskrit (H) CC 10, 4th Sem
Topic - Sanskrit study in east

Scanned with CamScanner